**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे
## संस्कृत पारंगत (एम.ए.) – बहिःस्थ
## परीक्षा: मे – २०२५
## सत्र १ ले
### विषय: सामान्य व्याकरण (22E311)

**दिनांक: १६/०५/२०२५** **गुण : १००** **वेळ : दु. २.०० ते ५.००**

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १ एकं विषयमधिकृत्य निबन्धो लेख्यः।** **(१५)**

१. दैवस्य का गतिः। २. मम महाविद्यालयः। ३. संस्कृत-महाकाव्यानि।

**प्र. २ द्वयोः माध्यमभाषया अनुवादं करुत।** **(१२)**

१. पूर्वं 'शलाकापरीक्षा' इति काचित् परीक्षापद्धतिः संस्कृतक्षेत्रे आसीत् । परीक्षां स्वीकर्तुकामः छात्रः कश्चन परीक्षकस्य पुरतः स्वेन अधीतस्य ग्रन्थस्य नाम वदति । परीक्षकः तस्मिन् ग्रन्थे शलाकां (काष्ठस्य रजतस्य वा सूचीं) यत्र योजयति तत् पृष्ठम् उद्घाट्य तत्रत्यं विषयम् अधिकृत्य विभिन्नान् प्रश्नान् पृच्छति । छात्रः सर्वेषाम् अपि समाधानं वदति । एवं परीक्षाकरणमेव शलाकापरीक्षा नाम । सामान्यतः दशवारं शलाकास्थापनं भवति स्म । तत्र त्रिवारं वाचिकपरीक्षा, अर्थात् उद्घाटिते पृष्ठे प्रथमं या पङ्क्तिः भवति ततः आरभ्य उत्तरोत्तरपङ्क्तयः परीक्षार्थिना ग्रन्थदर्शनेन विना स्मरणबलेन वक्तव्याः, यावत् परीक्षकः स्थगयति तावत् । अनन्तरं त्रिवारं यत्र शलाकया निर्दिश्यते ततः आरभ्य परीक्षार्थिना पङ्क्तीनाम् अर्थविवरणं स्ववाक्यैः करणीयम् । तदनन्तरं त्रिवारं चतुर्वारं वा शलाकानिर्दिष्टपङ्क्तीनां सम्बन्धे परीक्षकस्य प्रश्नाः परीक्षार्थिना समाधातव्याः । तन्नाम शलाका-परीक्षास्वीकरणाय समग्रः ग्रन्थः छात्रस्य स्मृतौ स्यात्, सम्पूर्णं व्याख्यातुम् अपि सः शक्नुयात् च । पूर्वं तावत् एकैकः अपि छात्रः बहुषु शास्त्रग्रन्थेषु शलाकापरीक्षार्थं सज्जः भवति स्म ! अद्यत्वे सा परम्परा लुप्ता ।

२. कः असौ गुरुः ? कीदृशः तस्य आकारः ? इदानीम् अशीतिवर्षदेशीयः । तदा तदा सम्पूर्णं शिरः मुण्डयति । भ्रूमध्ये स्थिरा नेत्रदृष्टिः । अतिकृशा प्रांशुश्च तनुः । कदाचित् मथुरानगरीम् आगत्य, यमुना यत्र मार्गं प्रादात् तत्र स्नात्वा, कृष्णजन्मस्थानं नमस्कृत्य गच्छति । एवं तस्यां वदन्त्यां – मम प्रथमतः प्रेरणां दत्तवान् सः एव स्यात् वा ? इति स्वगतमिव अहम् अभाषे । का प्रेरणा ? सहस्रारकमलम् इतोऽपि अधिकम् अलौकिकं प्रकाशं धत्ते । अपेक्षितकाले साक्षात्कृत्य द्रष्टुं शक्यते इति उक्तवतो योगिनः सन्दर्शनं, ततोऽन्येन योगिना कारितं मम ध्यानप्रवेशं च अधिकृत्य सर्वम् अवदम् । तां साधनां कस्मात् त्यक्तवान् ?''

३. जीवनस्य किमुद्देश्यं स्यादिति विचारे प्रथममेतत् समक्षं समायाति यत् जीवनस्योद्देश्यं समुन्नतं स्यात्, येन जीवनस्य सफलता स्यात् । समुन्नतेषु उद्देश्येषु देशसेवायाः समाजसेवायाः परोपकारस्य जातेरुद्धरणस्य विद्योन्नतेश्च भावना सम्मुखमायाति । मनुष्यः सामाजिकः प्राणी वर्तते, अतो यदि समाजः समुन्नतोऽस्ति तर्हि सर्वेऽपि सुखिनो भविष्यन्ति। यदि समाजो न समुन्नतोऽस्ति तर्हि सर्वेऽपि विपत्तिग्रस्ता दीना हीनाश्च भविष्यन्ति । यदि देशः पराधीनोऽस्ति तर्हि मनुष्येषु स्वाभिमानस्य भावना न भविष्यति । अतो मनुष्यजीवनस्य मुख्यमुद्देश्यं भवति यत् स मानवजीवनस्य साफल्याय परोपकारं कुर्यात्, देशसेवां कुर्यात्, समाजसेवां कुर्यात्, विद्यायाश्चोन्नतिं कुर्यात्। एवं प्रकारेणैव जीवनं सफलं भवति ।

**प्र. ३ द्वयोः माध्यमभाषया सान्वयमनुवादं करुत।** **(१२)**

१.प्रथमवयसि पीतं तोयमल्पं स्मरन्तः शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं न हि कृतमुपकारं साधवो विस्मरन्ति ।।

२.निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।।

३.विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम् विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम् विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।।

**प्र. ४ दश वाक्यानि संस्कृतभाषया अनुवदत।** **(१०)**

१. लोकांनी जनापवादाची भीती बाळगावी.
२. या बागेत सुंदर फुले आणि पिकलेली फळे आहेत.
३. तू आजच हे काम करायला हवे.
४. दोन शिक्षिका एकाच वर्गात शिकवतात.
५. मागील वर्षी खूप पाऊस पडला
६. जर प्रयत्न केले तर फळ नक्कीच मिळते.
७. उद्या मी गावाला जाईन.

८. सुमित्रेचा मुलगा भाऊ रामाबरोबर वनवासात गेला.
९. भावाला नमस्कार.
१० त्या गावातील लोक खोटे बोलत नाहीत.
११.आपण सगळे एकत्र काम करतो

**प्र. ५ अ. नव रूपाणि लिखत। (०९)**

१. नाम (नपुं.) द्वितीयाद्विवचनम्।
२.युष्मद् (सर्वनाम) तृतीयाएकवचनम्।
३. प्र+आप् (५ प.प.) लिङ् प्रथमपुरुषएकवचनम्।
४. नि+वस् (१प.प.) लङ् उत्तमपुरुषद्विवचनम्।
५. दृश् (१ प.प.) क्त्वा अव्ययम्।
६. पा (१ प.प.) कर्मणिरूपं लट् प्रथमपुरुषएकवचनम्।
७. कथ् (१० प.प.) लिट् प्रथमपुरुषबहुवचनम्।
८. नी (१ प.प.) हेत्वर्थकमव्ययम्।
९. चिन्त् (१० प.प.) क्तप्रत्ययान्तं पुं. प्रथमा बहुवचनम् ।
१०. लक्ष्मी प्रथमा एकवचनम्।
११. इदम् (नपुं. सर्वनाम) प्रथमा बहुचनम् ।

**प्र. ५ ब. चतुर्दशरूपाणां परिचयं लिखत। (१४)**

| | | | | |
|---|---|---|---|---|
| १.चतस्रः | २. विहस्य | ३. एतयोः | ४. गमिष्यामि | ५. हसितेन |
| ६. वारिणि | ७. लब्धवती | ८. इच्छन्ती | ९. लिखित्वा | १०. वदानि |
| ११. रमते | १२. सहेमहि | १३. अविन्दथाः | १४. सिच्यत | १५. पत्युः |
| १६. रमे | १७. अचिन्तयम् | | | |

**प्र. ६ अ. दश वाक्यानि सूचनानुसारं परिवर्तयत। (१०)**

१. वाटिकायां --- वृक्षाः सन्ति। । (त्रि इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)
२. त्वमपि स्वाभिप्रायं वद। (भवत् सर्वनाम्नः कर्तृपदं योजयत।)
३. सः वर्गम् ----- (आ+गम् ल्यप्) वदति ।
४. अहं रात्रौ द्रष्टुं न शक्नोमि (बहुवचने परिवर्तयत।)
५. भयाकुलाः जनाः अधिकं विचिन्तयन्ति। (लङ् लकारे परिवर्तयत।)
६. स वायसं व्यापाद्य गच्छति।। (द्विवचने परिवर्तयत।)
७. ----- नमः। ('गुरु' इति पदस्य योग्यं रूपं लिखत।)
८. महती वृष्टिः अस्ति । (लृट्लकारे परिवर्तयत।)
९. सैनिकः सूचनां वदति गच्छति च। (पूर्वकालवाचकं योजयत।)
१०. मातामही अत्र कार्यं करोति स्म।। (स्म निष्कासयत।)
११. ----- विना ग्रामं गमिष्यामि। (पुत्री इति पदस्य योग्यं रूपं लिखत।)
१२. बालिका अध्ययनाय स्पृहयति । (रुच् धातोः रूपं योजयत।)

**प्र. ६ ब. द्वयोः सन्धीन् कुरुत। (०२)**

१. एतत् + भवेत्  २. बालाभ्यः+ तम्  ३. प्राप्य+अत्रभवती  ४. सिद्धिः+ इव

**प्र. ६ क. चतुर्णां नामनिर्देशपूर्वकं समासविग्रहं कुरुत। (०८)**

अ. पत्रपुष्पाणि  आ. दीर्घयष्टिकया  इ. मूषकमार्जारम्  ई. मुखकमलम् उ. शशिशेखरः

**प्र. ७ अ. षण्णां वाच्यपरिवर्तनं कुरुत। (०६)**

१. तेन पराभूताः वयम्।
२. तिस्रः छात्राः हसन्ति।
३. त्वं किं मन्यसे।
४. त्वया भूमौ शयनं क्रियते।
५. व्याधेन सः नीतः।
६. तेन धनानि अलभ्यन्त।
७. शिशुं सा अनुजा पालयति।

**प्र. ७ ब. द्वयोः सतिसप्तमीवाक्यरचनां कुरुत निष्कासयत वा। (०२)**

१. विद्यायां सति विनयो भवति।
२. पुस्तके पठति सति ज्ञानं वर्धते।
३. यदा घण्टानादः भवति तदा छात्राः धावन्ति।

------------